**International Journal of Research in Social Sciences**
Vol.9 Issue 11, November 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# "हरनामामृतम्" इति महाकाव्यस्य चिन्तनपक्षस्यानुशीलनम्

**डॉ. हंसराज गुप्ता**
सहायक–आचार्यः, (संस्कृतवाङ्मयम)
राजकीय आचार्य संस्कृत महाविद्यालयः, कोटा

**सारांशः –**

विद्याधरशास्त्रिमहोदयेन विरचितं 'हरनामामृतम्' इति चरित्रप्रधानमहाव्यम् भारतीयसंस्कृतेः संरक्षणाय संवर्द्धनाय च महत्वम् आधत्ते एतदर्थमस्य महाकाव्यस्य चिन्तनपक्षस्यानुशीलने दार्शनिक पक्षं, सांस्कृतिक पक्षं, उदात्तभावनामन्वेषणपक्षं, प्राचीनतत्त्वानाम् अनुशीलम् इत्यादिषु विषयेषु विचक्षणानां मनीषीणां विचारान् संग्रहरूपेण प्रस्तुतमत्र।

महाकाव्यमिदं पं. विद्याधरशास्त्रि महोदयेन विरचितम्। अस्य कवेः महाकाव्यद्वयं वर्तते – 1. हरनामामृतम्, 2. विश्वमानवीयम्। षोडशसर्गात्मकेऽस्मिन् महाकाव्ये कविना स्वपितामहस्य जीवनचरितं वर्णितम्। भारतीयसंस्कृतेः गौरवस्य स्थायित्वसम्पादने यद् योगदानं महर्षीणां वर्तते तदविस्मरणीयेमव, तस्मिन् विषये कृतज्ञताज्ञापनाय शब्दकुसुमांजलिसमर्पणं प्रत्येकस्य भारतीयस्य दायित्वं वर्तते। तस्मिन्नेव क्रमे शास्त्रिमहेदयेन तपोमयजीवनजीवकस्य दानीनामग्रगण्यैकसात्त्विक ब्राह्मणस्य जीवनचरितं स्वकाव्यस्य इतिवृत्तरूपेण चितम्। अत्र चिन्त्यं वर्तते यत् महाकाव्यस्य नायकः कवेः पितामहः वर्तते अतः कदाचित् ''स्व कुलस्य प्रशस्तिरेव'' इति दोषनिराकरणाय स्वष्टीकरणमत्र –

**नेयं प्रशंसा हि कुलस्य काचित् सत्यप्रकाशाय निमित्तमेतत्।**
**शिष्यैर्यथाशक्ति सदैव सर्वैः गेयं हि नित्यं गुरू गौरवंच।**

कविः वांछति यत् येषां कवित्वप्रतिभायाः प्रकाशेन आलिकितमिदं साहित्यजगत् तेषां मस्विनां विचक्षणानाम् उदाचरितानां च काव्येषु नितरां सुतरां चिन्तनं, स्तवनम्, अभिनन्दनं च

**International Journal of Research in Social Sciences**
Vol.9 Issue 11, November 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

अहर्निशं भवेत्। महाकाव्यस्य मूले किंचिदपि विशिष्टं प्रेरणारूपेण भवति यत् सकल महाकाव्यस्य कलेवरे प्राणशक्तिसमा आद्यन्तयोः तिष्ठति। संस्कृतसाहित्यस्याभिनवमहाकाव्येषु प्राचीनार्वाचीनशैल्योः समन्वयेन महाकाव्यमिदं स्वविशिष्टगौरवेणादृतं वर्तते यत्र महाकाव्यस्य लक्षणानुबन्धं पूर्णरूपेणपालितं वर्तते। चरित्रप्रधानेऽस्मिन् महाकाव्ये भारतीयसंस्कृतेः संस्कृतस्य च पुनीतपरम्परायाः अजस्रप्रवाहे नितरां प्रयासरतानां कर्मनिष्ठद्विजाग्रगण्यानां नैष्ठिकजीवनचरितं चित्रितम्। अस्य महाकाव्यस्य चिन्तनपक्षस्यानुशीलनक्रमे कानिचित् महत्वपूर्णतथ्यानि प्रस्तूयन्ते –

**1. दार्शनिकपक्षः** –

अस्याः रचनायाः रचनाकारः दार्शनिकः वर्तते तदनुसारेण जीवनस्य दार्शनिकदृष्टेश्चाभिन्नता भारतस्य स्वकीयं वैशिष्ट्यं वर्तते। एतस्यां रचनायां वर्णाश्रमव्यवस्थानुसारेण भारतीयजीवनयापनपद्धतेः श्रेष्ठतायाः प्रतिपादनमस्ति। ज्ञान–भक्ति–कर्माख्यानाम् उपासनापद्धतीनाम् अपूर्वसंगमस्थलमिदं महाकाव्यानाम्। गीतायाः कर्मयोगस्य तु पदे–पदे उपासना परिलक्ष्यते। आराधनायामिष्टं प्रति निश्चलास्थायाः पूर्णसमर्पणभावस्य दर्शनं भवति एषा एव भक्तेः उत्कृष्टतमा स्थितिः वर्तते। यज्ञतत्त्वस्य पारम्परिकस्वरूपस्य व्याख्या युगानुरूपेण शाश्वतमूल्यैः सह कृतम्। ईश्वरजीवब्रह्मविषयकवार्ता दार्शनिकपक्षस्य एव प्रस्तुतिः वर्तते। यद्यपि दर्शनशास्त्रस्य कस्यापि शाखाविशिष्टस्यात्र व्याख्यानं नास्ति परम् अनेकेषां दार्शनिकसिद्धान्तानां श्लेषाद्यलंकारैः समन्विता निदर्शाना चमत्कारिकी वर्तते। यथा काश्याः कणे कणे कणादवृत्तेः कल्पना–

**"कणं कणं यत्र कणादवृत्तिः सर्वान् विशिष्टान् भुवने विधत्ते"**

सर्वहितसम्पादनार्थमुदाहरणमत्र प्रस्तूयते यत् यथा सत्वरजतमोभिः सुन्दरसृष्टेः रचनायां त्रयो गुणाः परस्परं विरोधिनः सन्ति तथैव अस्माकमपि दायित्वं वर्तते यत् विरोधभावान् निरूध्य पारस्परिकपेण सहयोगस्य भावनायाः उदयः भवेत्।

**सर्वश्च सर्वस्य सुखाभिनन्दी सर्वत्र सर्वाभ्युदयं विदध्यात्।**
**गुणा यथाऽन्योन्यकृतोपकारा स्त्रयोऽपिसंभूय सृजन्ति सर्गम्।।**

**International Journal of Research in Social Sciences**
Vol.9 Issue 11, November 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

जीवनस्य विचित्रा गातिः कदा किं परिवर्तनं जायते इति विषये प्रस्तुतिः –

**नैका स्थितिर्यत्र कदापि काचित् तज्जीवनं हन्त सदा विचित्रम्।**
**हसन् क्षणेऽस्मिन् परतो रूदन् सन् यस्मिन्नरो हन्त विरौति दीनम्।।**

एतस्मिन् सततपरिवर्तनशीले जगति न किमपि स्थायित्वेन वर्तते।सर्वमेव देवाधीनं वर्तते । सर्वस्य नियन्ता शक्तिरूपेण वर्तते। सः नानाविधनामभिः उच्चार्यते परं स एक एव वर्तते। सः पुरः दृश्यमाने जगति अनेकरूपेषु परिव्याप्तः वर्तते। ब्रह्माण्डस्य पारे निहिता या शक्तिः वर्तते तस्याः क्षणिकाभासः विचक्षणजनान् एव भवति। अत्र कविः प्रकटयति स्वविचारान्–

**"ब्रह्माण्डपारात् परतोऽपि किंचित् क्षणेन पश्यन्ति विभासमानम्।**

लोकस्य सकलव्यापारस्य नियतिः व्यक्तिगता न भवति अपितु समष्टिगता एव। हरनामामृते नियतिवादस्य स्वरः सर्वत्रैव श्रूयते। नियतिः या प्रकृतिः इति अपराख्या अभिहिता सा भयावहा क्रूरा नास्ति अपितु मातृवत् करूणामयी वर्तते अतः तस्याः हृदये दयाभावस्य प्रवणं शीघ्रमेव भवति।

**2. संस्कृतेः निरूपणम्–**

महाकाव्येऽस्मिन् कविः आद्यन्तं यावत् आर्षजीवनपद्धतौ श्रद्धावनतोऽस्ति। अत्र संस्कृतमनीषिषु व्याप्तात्महीनतायाः संकीर्णदृष्टेश्च निवारणाग्रहः वर्तते। हिन्दूधर्मस्य तस्य जीवनपद्धतेश्च समुज्ज्वलपक्षं प्रस्तुतम्। धार्मिकानुष्ठानां विधिपूर्वकेन सम्पादनं यज्ञेषु 'अहिंसा परमोधर्मः इति मतस्य दाढ्र्येन स्थापनं श्राद्धकर्मादीनां महत्ता इत्यादिभिः विषयैः भारतीयसंस्कृतेः सम्यक् स्वरूपस्य सुन्दरसर्जनायाः चित्रणं कृतम्। भारतीयसंस्कृतिं प्रति अनुरागस्य पर्याय एव भारतं प्रति श्रद्धा वर्तते अतः एषा कृतिः राष्ट्रीयभावनाभिः आप्लाविता वर्तते। राष्ट्रवादस्य चिन्तनानुशीलोऽयं धामिकचेतनायाः पतनस्य मूलकारणं पराधीनतामेव मन्यते सःआक्रोशेन लिखति यत् एतैः आङ्गलीयै अस्माकं वसुन्धरा अपूता कृता अतः एतेषां निष्कासनमनिवार्यमेव।

**रूधिरेण गवां धात्री भारतीयैर्विदूषिता।**
**तेषां यावन्न निष्क्रामस्तावदत्र सुखं कुतः।।**

अस्माकं देशे यत् वर्णसांकर्यं दृश्यते तत्र कारणमस्ति एते आङ्गलीयाः एतेषां शिक्षापद्धतिश्च। यतोहि यस्य देशस्य संस्कृतेः समूलोच्छेदनं करणीयं तर्हि आदौ तत्रत्या शिक्षापद्धतिः हन्तव्या, अतः तैः दुर्जनैः अस्माकं मूलेषु विषसिंचनम् कृतम्। अत्र महाकाव्ये संस्कृतेः अभिन्नाङ्गस्य नार्यः जीवनस्य चित्रणमपि सुष्ठु कृतम्। नारी भोगस्य वस्तु नास्ति अपितु स्रष्टुः स्नेहमयी ममतामयी च पूज्या सृष्टिः वर्तते।

**उक्तमपि–**

**''यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता''**

नार्यः नार्यत्वस्य उत्कृष्टविकासः तस्य मातृत्वे वर्तते न तु भोगरूपे। स्त्रीसुलभशालीनतायाः दिनानुदिनं जायमानस्य ह्रासस्य विषये चिन्तनं कृतम्–

**सृष्टा विकासाय भवे भवाय स्वभावतः स्नेहमयी कुलस्त्री।**
**लभेत शान्तिं न विकासशून्या सर्वः स्वभावानुगतो जगत्याम्।।**
**मातेति तस्याश्चरमो विकास : तत्रैव तस्या जगती कृतार्था।**
**भोगाय सृष्टा नहि केवलं स्त्री किं नाम  जाया जननी न चेत् सा।।**

**3. उदात्तभावानां भव्योन्मेषः–**

काव्यक्षेत्रे यदा कोऽपि विचारः कस्यापि चरित्रस्य चारित्र्यं स्वकीयोन्मेष– स्योदात्तसीमानं प्रति अग्रसरं भवति तदा औदात्यस्याधिकारी भवति तत्। ग्रीकदेशीयो आचार्यः लोंजाइनसः ''उदात्ततत्वं महाकाव्यस्य प्राणः '' इति वदति। काण्ट तया हीगलस्यानुसारेण अद्वितीयमहत्तायाः प्रतिपादकानाम् उदात्ततत्त्वानामभावे काव्यं निस्तेज एव भवति। यद्यपि भारतीयसाहित्यमनीषिणः स्वकाव्यलक्षणे उदात्ततत्त्वस्य सन्निवेशः न कृतवन्तः परं संस्कृतस्य सम्पूर्णसाहित्यम् एतेन पूर्णसमृद्धमस्ति। वास्तविकरूपेण औदात्यपूर्णसाहित्यमेव महदुद्देश्यानां प्राप्त्यर्थं स्वपाठकान् अभिप्रेरयति। एषा कृतिः पात्राणां चरित्रविकासः, भाषायाः प्रांजलताः, भावानां विचाराणां च उत्कृष्टता, आदर्शानां जीवनमूल्यानाञ्च महत्ता इत्यादिभिः दृष्टिभिः एकम्

उत्कृष्टोदात्तकाव्यमस्ति। प्रस्तुतेऽस्मिन् काव्ये नायकः स्वकीयेन सौम्यस्वभावेन शुभकर्मणा च अद्यतनीयान् अस्थिरमनांसि भारतीयान् संस्कृतेः पावनत्वेन परिचयं कारयति।

गभीरेषु उच्चविचारेष्वाश्रित्यौदात्यमतिरिच्य प्रस्तुतेऽस्मिन् काव्ये भाषाशैल्योः आधारितौदात्यमपि अत्याकर्षकं उत्कृष्टञ्च वर्तते। प्रायः प्रत्येकस्मिन् श्लोके अनुप्रासस्य रमणीयतया सह प्रसादगुणस्य युक्तिः वर्तते।

अत्र भावानां स्वकीयं विशिष्टाकर्षणमस्ति, भाषा अलङ्कृता स्वाभाविकरूपेण सरला च वर्तते। ''अस्मिन काव्ये व्यक्तविचाराणाम् उक्तीनाञ्च पठनेन श्रवनेन च पाठकश्रोतृगणः हठात् एव अहो विलक्षणम्, सर्वथा विलक्षणम्'' इत्यादिभिः मनोभावैः स्वतः एव अभिभूतो भवति। एषा स्थितिरेव औदात्यस्य स्थितिः वर्ततें

**4. प्राचीनकाव्यकृतीनां प्रभावः –**

ईश्वरप्रदत्तकवित्वशक्त्या सह एव काव्यशास्त्रीयग्रन्थानां ज्ञानमपि आवश्यकं वर्तते, एतस्मादेव कवितायां रमणीयता आगच्छति। एतदतिरिक्तं प्राचीनसमकालीनकाव्यकाराणां कृतीनां परिशीलनमपि अपेक्षितमस्ति। यतो हि सः अन्येषां कृतीनां परिशीलनेन एव स्वाभिव्यक्तौ नवीनतयाः उक्तिवैशिष्ट्यश्चोद्भावना कर्तुं शक्यते। सः अन्येषां कवीनां काव्यप्रभावोत्पादकताम् आत्मसात् कृत्वा नूतनभिव्यक्त्या यत्किमपि व्यञ्जयति सः स्वकीय एव भवति। नवीनता उक्तिवैचित्र्ये भवति। प्रचीन एव नूतनमर्थमादय नूतनोक्त्या चमत्कारेण च सह तस्याभिधानं करोति एतदेव काव्ये नवीनतायाः संचारकः भवति अतः ध्वनिकारेण उक्तम्

**ध्वनेर्यः सगुणीभूत व्यंग्यस्याथ्वा प्रदर्शितः।**
**अनेनानन्त्यमायाति कवीनां प्रतिमां गुणः।।**
**अतो वा ह्मन्यतमेनापि प्रकारेण विभूषिता।**
**वाणी नवत्वमायाति पूर्वार्थान्वयवत्यपि।।**

**International Journal of Research in Social Sciences**
Vol.9 Issue 11, November 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

कविः अधिकांशतया प्राचीनान् तत्वान नवीन भंगिमया सह एव कथयति अतः एषः कविः पूर्णतया विनयेन निवेदनयति यत् प्राच्यकविकवित्वेन सह मम तुलना नोचिता न तावती शक्तिः अपितु अहं तु तेषां गानं श्रुत्वा पुनः स्वकीये गीते स्वभाववन् ''नूतनत्वेनप्रकटयितुं प्रयासं करोमि।

**गीतं यथा गीतमहो पुराणैस्तथा न गातुं विभवो मदीयः।**
**श्रुतानि गीतानि परं कवीनां तान्येव गुञ्जामि मनोविनोदी।।**

एवं हरनामामृतम् कृतिरियं भाषायाः प्रासादिकता शैल्याः रमणीयता च दृष्टया कालिदासस्य कृतीनां समीपे वर्तते। कुत्रापि पदस्यार्थग्रहणे पाठकानां काठिन्यं नास्ति अतः कवेः भावैः विचारैश्च सह आत्मानुभूतिं सरलतया भवति।

**5. मनीषीमन्तव्यः—**

हरनामामृतम् इत्यस्य प्रकाशनम् अभिनवसंस्कृतजगति स्वस्य विशिष्टं महत्वं आधत्ते। एतस्य महाकाव्यस्य समकालिकैः संस्कृतज्ञैः अद्भुतं स्वागतं विहितं तदस्ति अस्य साहित्यिकसांस्कृतिकमहत्वस्य परिचायिकता संस्कृत—हिन्दी—अंग्रेजी आसु तिसृषु भाषासु यानि मन्तव्यानि प्राप्तानि सन्ति तेषु मन्तव्येषु कानिचित् उद्धरणान्यत्र दीयन्ते —

भारतदेशस्य महान् संस्कृतज्ञः श्रीप्रफुल्लचन्द्र भंजदेवः काव्यमिदं पठनोपरान्तं स्वकीयं विचारं प्रकटयति—

**यथार्थनामा भगवान् विद्याधरः सुधिर्भुवि।**
**विधाधरा कथा जाता पराविद्यारतो भवान्।।**

स्व. नरदेवशास्त्रिमहोदयः काव्यमिदं धर्मतत्त्व— स्यावबोधकमुक्त्वा लिखित— **''धर्मतत्त्वावबोधकमेतत् काव्यम्''** तत्रैव महामहोपाध्यायः परमेश्वरानन्दःलिखति यत् हरनामामृतं संस्कृतभाषायाः विश्वकोषः वर्तते। वृन्दावनगुरूकुलस्य कुलपतिः आचार्यद्विजेन्द्रनाथः स्वसम्मतिं प्रकटयति कविकर्मकुशलेन प्रदीप्तप्रतिभाशालिना अमुना कविना विविधवृत्तविभूषितेऽस्मिन् काव्ये ते ते विषया :—

अथयात्र प्रौढः पद्यप्रबन्धः कमनीया कोमला च पदावलिः। किमप्यवर्णनीयं वर्णमाधुर्यं शब्दालंकाराः अर्थालंकाराश्च काव्ये। रसिकानामा स्वादनाय तथोपनिबद्धा येन रचनेयं भाषकालिदासबिल्हणप्रभृतिमहाकवीनां कृतिर्बलादिव संस्मारयति।।

राजस्थान प्राच्यविद्यामूर्धन्यः मनस्वी स्व. विश्वेश्वरनाथरेऊ महोदयस्यानुसारेण–

**हरनामामृतम् विद्याधरहृतसिन्धुनिर्गतम्।**
**पीत्वा पीत्वाऽत्र बिबुधाः केन तृप्यन्ति भूतले ।।**

राजस्थानस्य आशुकविः स्व. नित्यानन्दः एतस्य काव्यकारस्य कवित्वशक्तिं प्रशंसति–

**कविर्विद्याधरो जीव्याच्चिरं शिष्टशिरोमणिः।**
**हरनामामृतं यस्य हृदयाब्धे विनिर्गतम्।।**
**तादृक् सुरसरस्वत्याः प्रवाहः सम्मुखीकृतः।**
**यस्य दर्शनमात्रेण पदार्थाऽधिगमः स्फुटः।।**

सिन्धुलिपिविशेषज्ञः संस्कृतभाषायाः सम्पोषकः प्रोफेसर डॉ. फतेहसिंहः आग्लभाषायां स्वविचारान् प्रकटयति–

I have read with interest the 'lilalahari' and 'Harnamamritum' the works of pt. vidhya dhar Shashtri. Both the works contain a exquisite in diction. The enchanting mugic and felicity of expression of Lilalahari have as much impressed me as the cultural thought and spirtinal thought of Harnamamritum.

सुप्रसिद्धेन आंग्लभाषायाः हिन्दू इत्याख्येन समाचार पत्रेण हरनामामृतम् इत्यस्याः कृतेः मूल्याकंनरूपेण विचाराः प्रस्तुताः–

The gushing eloquence of the peotry and the naturalness with which the thoughts unfirl themselves strike the readers at first as the most note worthy teature of the poem. Closer scrutiny can reveal valueble substance in the thoughts.

एवम्प्रकारेण महाकाव्यमिंद अस्य युगस्य संस्कृतविज्ञानां संस्कृतानुरागिणां च कृते आनन्दातिरेकस्योद्भाविका कृतिः।

**संदेशाः –**

भारतीयतायाः उदीप्तभावैः विभासितमिदं काव्यं विश्वहिताय सर्वजनसुखाय कर्त्तव्यपालनाय च प्रत्येकं मानवं संदिशति। विश्वव्यापिनीदृष्टिरेव सात्विकभावानाम् उद्भवकारिणी विकासिनी च भवति अतः कविः कथयति–

**सर्वे देशाः स्वदेशा नः हिते लोकस्य नो हितम्।**
**व्यापिनी नो महादृष्टिः कस्य क्षेत्रे न वर्षति।।**

व्यापकदृष्टेः विकासाय क्षुद्रदृष्टिरेव सदा बाधारूपेण तिष्ठति। क्षुद्रचिन्तनादेव मिथ्यांहकारस्योत्पादनं भवति, मानवः सत्यात् परे च जायते। सत्यस्य प्राप्त्यर्थं हृदये सत्यं प्रति श्रद्धा आवश्यिकी वर्तते। विना श्रद्धां सत्यस्य प्राप्तिः कदापि संभवं नास्ति।

एवं 'हरनामामृतम्' इति काव्यस्य प्रणेता पाठकान् विश्वकल्याणाय स्वस्य समर्पणार्थमुपदिशति तथा मानवमात्रं स्वकीयस्य सात्त्विकविकासाय श्रेष्ठगुणानाम् उदात्तदृष्टेश्च प्रवर्धनार्थम् आह्वानं करोति। कवेः दृष्ट्यानुसारेण द्विजत्वस्य प्रप्तिरेव मानवविकासस्य उच्चतमादर्शस्य स्थितिः वर्तते।

## संदर्भग्रन्थसूची–

1. हरनामामृतम्
2. विश्वमानवीयम्
3. संस्कृतसाहित्यस्येतिहासः
4. भारतीयसंस्कृतिः
5. ध्वन्यालोकः

6. मनुस्मृतिः
7. सांख्यकारिका
8. सर्वदर्शनसंग्रहः
9. संस्कृतनिबन्धशतकम्
10. गीर्वाणगिरागौरवम्।

**– इति शिवम् ।**